শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ওং নমো ভগৱতে ৱাসুদেৱায

# মহর্ষি ৱেদৱ্যাসপ্রণীতং শ্রীমদ্ভাগৱতমহাপুরাণম্

# ॥ প্রথমস্কন্ধে দ্বাদশোঽধ্যাযঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ওং নমো ভগৱতে ৱাসুদেৱায

# শ্রীমদ্ভাগৱতমহাপুরাণম্

# ॥ প্রথমস্কন্ধে দ্বাদশোঽধ্যাযঃ ॥

শৌনক উৱাচ
অশ্বত্থাম্নোপসৃষ্টেন ব্রহ্মশীর্ষ্ণোরুতেজসা।
উত্তরাযা হতো গর্ভ ঈশেনাজীৱিতঃ পুনঃ ॥ **1** ॥

তস্য জন্ম মহাবুদ্ধেঃ কর্মাণি চ মহাত্মনঃ।
নিধনং চ যথৈৱাসীৎস প্রেত্য গতৱান্ যথা ॥ **2** ॥

তদিদং শ্রোতুমিচ্ছামো গদিতুং যদি মন্যসে।
ব্রূহি নঃ শ্রদ্দধানানাং যস্য জ্ঞানমদাচ্ছুকঃ ॥ **3** ॥

সূত উৱাচ
অপীপলদ্ধর্মরাজঃ পিতৃৱদ্ রঞ্জযন্ প্রজাঃ।
নিঃস্পৃহঃ সর্ৱকামেভ্যঃ কৃষ্ণপাদাব্জসেৱযা ॥ **4** ॥

সম্পদঃ ক্রতৱো লোকা মহিষী ভ্রাতরো মহী।
জম্বূদ্বীপাধিপত্যং চ যশশ্চ ত্রিদিৱং গতম্ ॥ **5** ॥

কিং তে কামাঃ সুরস্পার্হা মুকুন্দমনসো দ্বিজাঃ।
অধিজহ্রুর্মুদং রাজ্ঞঃ ক্ষুধিতস্য যথেতরে ॥ **6** ॥

মাতুর্গর্ভগতো ৱীরঃ স তদা ভৃগুনন্দন।
দদর্শ পুরুষং কঞ্চিদ্দহ্যমানোঽস্ত্রতেজসা ॥ **7** ॥

অঙ্গুষ্ঠমাত্রমমলং স্ফুরৎপুরটমৌলিনম্।
অপীচ্যদর্শনং শ্যামং তডিদ্বাসসমচ্যুতম্॥ **8** ॥

শ্রীমদ্দীর্ঘচতুর্বাহুং তপ্তকাঞ্চনকুণ্ডলম্।
ক্ষতজাক্ষং গদাপাণিমাত্মনঃ সর্ব্বতোদিশম্।
পরিভ্রমন্তমুল্কাভাং ভ্রাময়ন্তং গদাং মুহুঃ॥ **9** ॥

অস্ত্রতেজঃ স্বগদয়া নীহারমিৱ গোপতিঃ।
ৱিধমন্তং সন্নিকর্ষে পর্য্যৈক্ষত ক ইত্যসৌ॥ **10** ॥

ৱিধূয় তদমেয়াত্মা ভগৱান্ধর্মগুব্ ৱিভুঃ।
মিষতো দশমাসস্য তত্রৈৱান্তর্দধে হরিঃ॥ **11** ॥

ততঃ সর্ব্বগুণোদর্কে সানুকূলগ্রহোদয়ে।
জজ্ঞে ৱংশধরঃ পাণ্ডোর্ভূয়ঃ পাণ্ডুরিৱৌজসা॥ **12** ॥

তস্য প্রীতমনা রাজা ৱিপ্রৈর্ধৌম্যকৃপাদিভিঃ।
জাতকং কারয়ামাস ৱাচয়িৎৱা চ মঙ্গলম্॥ **13** ॥

হিরণ্যং গাং মহীং গ্রামান্ হস্ত্যশ্ৱান্ নৃপতির্ৱরান্।
প্রাদাৎস্ৱন্নং চ ৱিপ্রেভ্যঃ প্রজাতীর্থে স তীর্থৱিৎ॥ **14** ॥

তমূচুর্ব্রাহ্মণাস্তুষ্টা রাজানং প্রশ্রয়ান্ৱিতম্।
এষ হ্যস্মিন্ প্রজাতন্তৌ পুরূণাং পৌরৱর্ষভ॥ **15** ॥

দৈৱেনাপ্রতিঘাতেন শুক্লে সংস্থামুপেয়ুষি।
রাতো ৱোঽনুগ্রহার্থায় ৱিষ্ণুনা প্রভৱিষ্ণুনা॥ **16** ॥

তস্মান্নাম্না ৱিষ্ণুরাত ইতি লোকে বৃহচ্ছ্রৱাঃ।
ভৱিষ্যতি ন সন্দেহো মহাভাগৱতো মহান্॥ **17** ॥

যুধিষ্ঠির উৱাচ
অপ্যেষ ৱংশ্যান্ রাজর্ষীন্ পুণ্যশ্লোকান্ মহাত্মনঃ।
অনুৱর্তিতা স্বিদ্যশসা সাধুৱাদেন সত্তমাঃ॥ **18**॥

ব্রাহ্মণা ঊচুঃ
পার্থ প্রজাৱিতা সাক্ষাদিক্ষ্ৱাকুরিৱ মানৱঃ।
ব্রহ্মণ্যঃ সত্যসন্ধশ্চ রামো দাশরথির্যথা॥ **19**॥

এষ দাতা শরণ্যশ্চ যথা হ্যৌশীনরঃ শিবিঃ।
যশো ৱিতনিতা স্বানাং দৌষ্যন্তিরিৱ যজ্ৱনাম্॥ **20**॥

ধন্বিনামগ্রণীরেষ তুল্যশ্চার্জুনযোর্দ্ৱযোঃ।
হুতাশ ইৱ দুর্ধর্ষঃ সমুদ্র ইৱ দুস্তরঃ॥ **21**॥

মৃগেন্দ্র ইৱ ৱিক্রান্তো নিষেৱ্যো হিমৱানিৱ।
তিতিক্ষুর্ৱসুধেৱাসৌ সহিষ্ণুঃ পিতরাৱিৱ॥ **22**॥

পিতামহসমঃ সাম্যে প্রসাদে গিরিশোপমঃ।
আশ্রযঃ সর্ৱভূতানাং যথা দেৱো রমাশ্রযঃ॥ **23**॥

সর্ৱসদ্গুণমাহাত্ম্যে এষ কৃষ্ণমনুব্রতঃ।
রন্তিদেৱ ইৱোদারো যযাতিরিৱ ধার্মিকঃ॥ **24**॥

ধৃত্যা বলিসমঃ কৃষ্ণে প্রহ্লাদ ইৱ সদ্গ্রহঃ।
আহর্তৈষোঽশ্ৱমেধানাং ৱৃদ্ধানাং পর্যুপাসকঃ॥ **25**॥

রাজর্ষীণাং জনযিতা শাস্তা চোৎপথগামিনাম্।
নিগ্রহীতা কলেরেষ ভুৱো ধর্মস্য কারণাৎ॥ **26**॥

তক্ষকাদাত্মনো মৃত্যুং দ্বিজপুত্রোপসর্জিতাৎ।
প্রপৎস্যত উপশ্রুত্য মুক্তসঙ্গঃ পদং হরেঃ॥ **27**॥

জিজ্ঞাসিতাত্মযাথাত্ম্যো মুনের্ব্যাসসুতাদসৌ।
হিৎৱেদং নৃপ গঙ্গাযাং যাস্যত্যদ্ধাকুতোভযম্॥ **28**॥

ইতি রাজ্ঞ উপাদিশ্য ৱিপ্রা জাতককোৱিদাঃ।
লব্ধাপচিতযঃ সর্ৱে প্রতিজগ্মুঃ স্বকান্ গৃহান্॥ **29**॥

স এষ লোকে ৱিখ্যাতঃ পরীক্ষিদিতি যৎপ্রভুঃ।
গর্ভে দৃষ্টমনুধ্যাযন্ পরীক্ষেত নরেষ্ৱিহ॥ **30**॥

স রাজপুত্রো ৱৱৃধে আশু শুক্ল ইৱোডুপঃ।
আপূর্যমাণঃ পিতৃভিঃ কাষ্ঠাভিরিৱ সোঽন্ৱহম্॥ **31**॥

যক্ষ্যমাণোঽশ্ৱমেধেন জ্ঞাতিদ্রোহজিহাসযা।
রাজালব্ধধনো দধ্যাৱন্যত্র করদণ্ডযোঃ॥ **32**॥

তদভিপ্রেতমালক্ষ্য ভ্রাতরোঽচ্যুতচোদিতাঃ
ধনং প্রহীণমাজহ্রুরুদীচ্যাং দিশি ভূরিশঃ॥ **33**॥

তেন সম্ভৃতসম্ভারো ধর্মপুত্রো যুধিষ্ঠিরঃ।
ৱাজিমেধৈস্ত্রিভির্ভীতো যজ্ঞৈঃ সমযজদ্ধরিম্॥ **34**॥

আহূতো ভগৱান্ রাজ্ঞা যাজযিৎৱা দ্বিজৈর্নৃপম্।
উৱাস কতিচিন্মাসান্ সুহৃদাং প্রিযকাম্যযা॥ **35**॥

ততো রাজ্ঞাভ্যনুজ্ঞাতঃ কৃষ্ণযা সহ বন্ধুভিঃ।
যযৌ দ্বারৱতীং ব্রহ্মন্ সার্জুনো যদুভির্ৱৃতঃ॥ **36**॥

॥ ইতি শ্রীমদ্ভাগৱতে মহাপুরাণে পারমহংস্যাং সংহিতাযাং
প্রথমস্কন্ধে নৈমিষীযোপাখ্যানে পরীক্ষিজ্জন্মাদ্যুৎকর্ষো নাম
দ্বাদশোঽধ্যাযঃ॥